# A-II/1/2370/ 21

## चतुर्थसत्रार्द्धम्

## प्रथमपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ऊर्जमिति पदस्य अभिप्रायः कः?
2. अश्मन्नूर्जमिति मन्त्रे छन्दः किम्?
3. शौधकः कः?
4. सृष्टिः कस्मात् तत्त्वात् समुत्पन्ना?
5. 'घनाघनः' पदस्य कोऽर्थः?
6. धाता कः भवति?
7. अश्नुते व्याप्नोतीति कः?
8. देवतानां पुरोहितः कः?
9. शुक्राचार्यः केषां गुरुः विद्यते?
10. 'क्षेमः' इत्यस्य कोऽर्थः?

**अथवा**

वसोर्धारा कस्मिन् अग्नौ दीयते?

11. 'वसु' पदस्य किं तात्पर्यम्?

**अथवा**

'अर्कः' पदस्य अर्थं लिखत।

12. 'समाः' पदस्य कोऽर्थः?

**अथवा**

'कल्पन्ताम्' इति पदस्य कोऽर्थः?

13. 'गिरयः' पदस्य कोऽर्थः?

14. वसोर्धारादिमन्त्राः कस्मिन् अध्याये वर्णिताः?

**अथवा**

'यन्ता' पदस्य अर्थः कः?

15. 'ज्ञात्रं' पदस्य अर्थं लिखत।

**अथवा**

'धृति' पदस्य तात्पर्यं लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. नमो बिल्मिने. . . . .चाहनन्याय च॥ –रिक्तस्थानं पूरयत।

17. नमः स्रुत्याय. . . . .वैशन्ताय च॥ –रिक्तस्थानं पूरयत।

**अथवा**

नमो वात्याय. . . . .चारुणाय च॥ –रिक्तस्थानं पूरयत।

18. नमः सिकत्याय. . . . .प्रपव्याय च॥ –रिक्तस्थानं पूरयत।

**अथवा**

नमः शुष्क्याय च हरि. . . . .० इति मन्त्रं सम्पूर्णं लिखत।

19. नमः पर्णाय च. . . . .आनिर्हतेभ्यः॥ –रिक्तस्थानं पूरयत।

**अथवा**

परि नो रुद्रस्य हेति. . . . .० इति मन्त्रं सम्पूर्णं लिखत।

20. नीलग्रीवा शितिकण्ठा. . . . .० इति मन्त्रं सस्वरं लिखत।

**स. दीर्घोत्तरीयप्रश्नः समाधेयः।** **(1×20=20)**

21. वेददीपकारस्य जीवनपरिचयं लिखत।

**अथवा**

सप्तदशाध्यायस्य कण्डिकात्रयस्य महीधरदिशा भाष्यं लिखत।

# A-II/2/2371/ 21

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. कदा पर्यन्तं पिण्डपितृयज्ञः करणीयः?
2. हस्ते कति तीर्थानि सन्ति?
3. पितृणाम् अवनेजनादिकार्याणि केन तीर्थेन भवति?
4. सकृदाच्छिन्नः कुशः कः भवति?
5. षड्वारं नमस्कारान् पितृभ्यः कः करोति?
6. स्थालीस्थपिण्डान् कः जिघ्रति?
7. यजमानपत्नी केन मन्त्रेण पिण्डभक्षणं कुर्यात्?

**अथवा**

जीवपितृकः पितामहादीनां पिण्डदानं न कुर्यात् इति कस्य मतम्?

8. दर्शयागस्य अङ्गं किम्?
9. अध्वर्युः कदा पलाशशाखां छिन्द्यात्?

**अथवा**

उपवेषः कुत्र भवति?

10. 'कामधुक्ष' इति प्रश्नम् अध्वर्युः कं प्रति कुर्यात्?

**अथवा**

चतुर्थाध्यायस्य प्रथमकण्डिकायां कति सूत्राणि?

11. कयोः संयोगेन यज्ञः भवति?

**अथवा**

पञ्चमाध्यायस्य प्रथमकण्डिकायाः विषयवस्तु किम्?

12. लोहित इव क:?

13. करम्भ: क:?

**अथवा**

अपत्नीक: यजमान: कीदृशं यज्ञं कुर्यात्?

14. पितृभ्य: द्वितीयं हवि: किम्?

15. प्रात: कालस्य अग्निहोत्रं कदा कुर्यात्?

**ब. सर्वे लघूत्तरीया: प्रश्ना: समाधेया:।** **(5×6=30)**

16. अपराह्ने पिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावस्यायाम्। इति सूत्रं विवृणुत।

17. पिण्डदानाय अवनेजनकार्यं वर्णयत।

**अथवा**

मध्यपिण्डभक्षणं ससूत्रं प्रतिपादयत।

18. सान्नाय्ययागस्य नियमं लिखत।

**अथवा**

अमावस्यायामग्न्याधेयम्॥ इति सूत्रं व्याख्यात।

19. वैश्वानरो द्वादशकपालचरुरुत्तर:। इति सूत्रं व्याख्यात।

20. द्विदेवतोऽपि नियमसामर्थ्यात्। इति सूत्रं विवृणुत।

**अथवा**

व्रतोपायनं वाऽकृतं चेत्। इति सूत्रस्य तात्पर्यं निरूपयत।

**स. दीर्घोत्तरीयप्रश्न: समाधेय:।** **(1×20=20)**

21. पिण्डपितृयज्ञ: दर्शाङ्गं नास्ति इति पूर्वपक्षस्य मतं निराकुरुत।

**अथवा**

चातुर्मास्ययज्ञस्य कयोश्चिद् द्वयो: पर्वणो वर्णनं कुरुत।

**अथवा**

वैश्वदेवपर्वण: स्वरूपं लिखत।

# A-II/3/2372/ 21

## चतुर्थसत्रार्द्धम्

## तृतीयपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. ग्रन्थारम्भे कस्य स्तुतिं करोति माधवाचार्यः?
2. माध्यन्दिनशाखा केन वेदेन सम्बद्धा?
3. माधवाचार्यस्य परिपालकः राजा कः आसीत्?
4. न्यायमालायाः मङ्गलश्लोकं लिखत।
5. शुक्लयजुर्वेदब्राह्मणे कति अध्यायाः सन्ति?
6. छन्दःशास्त्रस्य द्वितीयाध्याये कति सूत्राणि सन्ति?
7. कतिपयश्रौतयागानां नामानि लिखत।
8. मीमांसाशास्त्रानुसारं धर्मलक्षणं किम्?
9. आस्तिकदर्शनानां नामानि लिखत।
10. वेदशब्दस्य पर्यायान् लिखत।
11. ग्रहनामकपात्रस्य उपयोगः कस्मिन् यागे भवति?

**अथवा**

प्रमुखमीमांसाग्रन्थानां नामानि लिखत।

12. मुखत्वेन वेदस्य किमङ्गमुपमीयते?

**अथवा**

कठशाखा कस्य वेदस्य भवति?

13. दर्शपूर्णमासे हविष्कृत् कः?

**अथवा**

'अग्नीन् विहर' इति प्रैषं कस्मै दीयते?

14. ऐद्राग्नं हवि: कति कपालात्मकं भवति?

**अथवा**

माधवाचार्य: कस्य देशस्य अभिजन: आसीत्?

15. अग्ने: कति कपालात्मक: पुरोडाश: विहित:?

**अथवा**

कतिपयवैदिकछन्दसां नामानि लिखत।

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'द्वौ द्वौ साम्नां वर्धेत' इति सूत्रं व्याख्यात।

17. 'ग्रहं सम्मार्ष्टि' इत्यनेन सर्वेषां ग्रहाणां सम्मार्जनं कर्तव्यम् इति सिद्धान्तं निरूपयत।

**अथवा**

'हस्तावववनेनिक्ते, उलपराजिं स्तृणाति' इति वाक्यगतविचारान् प्रस्तुवत।

18. वाक्यस्य प्रकरणात् बलीयत्वं प्रतिपादयत॥

**अथवा**

न संवदेत मलवद्वाससेत्यपि पूर्ववत्।
पुमर्थ: स्यात्क्रतौ क्वापि संवादस्याऽप्रसक्तित:॥
इति श्लोकं व्याख्यात।

19. ऋत्विजां सङ्ख्यानियम: अस्ति न वेति विचारयत।

**अथवा**

अश्वप्रतिग्रहेष्टिविचारं न्यायमालादिशा निरूपयत।

20. वषट्कर्तु: प्रथमभक्षणं निरूपयत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. माधवाचार्यस्य परिचयमुपस्थापयत।

**अथवा**

कतिपयमीमांसान्यायानां विश्लेषणं कुरुत।

**अथवा**

छन्द: शास्त्रे प्रथम-द्वितीयाध्यायस्य विषयविवेचनं कुरुत।

# A-II/4/2373/ 21

**चतुर्थसत्रार्द्धम्**

**चतुर्थपत्रम्**

**वेदः**

**समयः घण्टात्रयम्** **पूर्णाङ्काः 100**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. "वृकः" इति पदस्य कोऽर्थः?
2. "शम्बः" इति पदस्य निर्वचनं किम्?
3. निरुक्तस्य पञ्चमेऽध्याये कति पादाः सन्ति?
4. "जरयिता" इति पदस्य कोऽभिप्रायः?
5. "मुष्टिः" कथम्?
6. "धम्" धातोः कोऽर्थः?
7. "उपलप्रक्षिणी" इति पदस्य किं निर्वचनम्?

**अथवा**

नैरुक्तानां मते "उपसि" इति पदस्य कोऽर्थः?

8. निरुक्तेपरिशिष्टे कति अध्यायाः सन्ति?
9. "चरुः" कस्मात्?
10. "भृमिः" कस्मात्?
11. "वसुः" कस्य विशेषणम्?
12. कस्मिन् अर्थे "जिवि" धातोः प्रयोगः क्रियते?

**अथवा**

"अरायासः" इति पदस्य कोऽर्थः?

13. निरुक्तशास्त्रस्य भाष्यकारः कः?

**अथवा**

"बत" इति निपातस्य प्रयोगः कस्मिन् अर्थे भवति?

14. "वायः वेः पुत्रः" इत्यस्य कोऽभिप्रायः?

**अथवा**

आधवः कस्मात्?

15. अध्वर्युगणे के ऋत्विजः भवन्ति ?

**अथवा**

"निरुक्तम्" इति पदस्य का परिभाषा ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. "बुन्दः" इति पदस्य निर्वचनं सविस्तरं कुरुत।

17. "कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँइभेन।
तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः॥"
–इति मन्त्रं भाष्यदिशा वर्णयत।

**अथवा**

"आशीः" इति पदं निर्वचनपूर्वकं सोदाहरणं व्याख्यात।

18. श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत।
वसूनि जाते जनमान ओजसा प्रतिभागं न दीधिम॥
इति मन्त्रं यास्कदिशा व्याख्यात।

**अथवा**

"अजीगः" इति पदं निर्वचनपूर्वक सोदाहरणं विवेचयत।

19. "उपलप्रक्षिणी" इति पदं सनिर्वचनं व्याख्यात।

20. "अरुणो मासकृद् वृकः पथा यन्तं ददर्श हि।
उज्जिहीते निचाय्या तष्टेव पृष्ठ्यामयी चित्रं मे अस्य रोदसी॥"
–इति मन्त्रं भाष्यानुसारं व्याख्यात।

**अथवा**

"असंत्रम्" इति पदस्य निर्वचनं सोदाहणं विलिखत।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. "वेदाङ्गेषु निरुक्तशास्त्रस्य वैशिष्ट्यम्" वर्णयत।

**अथवा**

षष्ठाध्यायस्य विषयं स्वगिरा सारांशरूपेण विवेचयत।

# A-II/5/2374/ 21

## चतुर्थसत्रार्द्धम्

## पञ्चमपत्रम्

## वेदः

**समयः घण्टात्रयम्** **पूर्णाङ्काः 80**

**अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः।** **(15×2=30)**

1. सप्तानां छन्दसां नामानि लिखत।
2. ऋग्वेदे कति अध्यायाः सन्ति ?
3. निरुक्तशब्दस्य व्युत्पत्तिं प्रदर्शयत।
4. छन्दः वेदपुरुषस्य किमङ्गं कथ्यते ?
5. गायत्रीच्छन्दसि कति अक्षराणि सन्ति ?
6. यजुर्वेदस्य ऋत्विक् कः ?
7. सूर्यस्य स्थानं कुत्र भवति ?
8. सायणभाष्यस्य नाम किम् ?
9. निरुक्तानुसारेण देवतानां स्थानं कुत्र कुत्र भवति ?
10. चतुर्णाम् आश्रमाणां नामानि लिखत।
11. रुद्रविषयकम् एकं मन्त्रं लिखत।

**अथवा**

प्रमुखब्राह्मणग्रन्थानां नामानि लिखत।

12. वाजसनेयिसंहितायां कति अध्यायाः सन्ति ?

**अथवा**

श्रौतसूत्राणां मुख्यं प्रतिपाद्यं किं वर्तते ?

13. राजसूययागे कस्य वर्णस्य अधिकारः ?

**अथवा**

वाजसनेयिसंहितायाः प्रथमं मन्त्रं लिखत।

14. वृत्रासुरः केन हतः अभवत् ?

**अथवा**

'सहस्रशीर्षा पुरुषः. . . . .दशाङ्गुलम्॥' इति मन्त्रं पूरयत।

15. मीमांसाशास्त्रस्य प्रवर्तकः कः ?

**अथवा**

'शिपिविष्टः' इति विशेषणेन कस्य स्तुतिः ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. कमप्येकं मन्त्रमाश्रित्य संहितापाठं पदपाठं च लिखत।

17. माध्यन्दिनसंहितायाः पञ्च मन्त्रान् सस्वरं लिखत।

**अथवा**

समाम्नायः समाम्नातः, स व्याख्यातव्यः॥ इति निरुक्तवाक्यं व्याख्यात।

18. ईशावास्योपनिषदः पञ्च मन्त्रान् लिखत।

**अथवा**

ऋत्विक्षु अध्वर्योः प्राधान्यं प्रतिपादयत।

19. सोमयागे वरणीयान् षोडशर्त्विजां नामानि गणशः लिखत।

**अथवा**

रुद्राध्यायस्य पञ्च मन्त्रान् सस्वरं लिखत।

20. पुरुषसूक्तस्य पञ्च मन्त्रान् सस्वरं लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** **(1×20=20)**

21. प्रातिशाख्यानाम् उपादेयत्वं वर्णयत।

**अथवा**

यजुर्वेदस्य सम्प्रदायभेदं प्रदर्शयत।

**अथवा**

सप्तसोमसंस्थानां नामानि विलिख्य एकैकं व्याख्यात।